

कीर्तिसिंहकथा - १

प्राचीने काले कोसलदेशं सुषेणः नाम राजा पालयति स्म। तस्य जयसेनः नाम आत्मीयं मित्रम् आसीत्। जयसेनः सुषेणस्य न केवलम् आत्मीयं मित्रम्, अपि तु आन्तरङ्गिकः मार्गदर्शकः अपि। चतुरङ्गक्रीडायां नितराम् आसक्तः राजा मित्रेण जयसेनेन सह सदा चतुरङ्गक्रीडां क्रीडति स्म।

कदाचित् चतुरङ्गक्रीडायां राजानं जितवान् जयसेनः हसन् उक्तवान् - ''एतस्यां क्रीडायां भवन्तं जितवता मया यावान् आनन्दः प्राप्यते ततोऽपि शतगुणितः आनन्दः पुत्र्या पराजीयमानेन प्राप्यते। एतत् तु नितराम् आश्चर्यकरम्!'' इति।

जयसेनस्य एकमात्रपुत्री शक्तिसेना। सा रूपवती, गुणवती, बुद्धिमती चापि आसीत्। एतत् श्रुतवान् अपि राजा किमपि अजानन् इव आश्चर्येण पृष्टवान् - ''किं भवतः पुत्री चतुरङ्गक्रीडायां तावत् नैपुण्यं प्राप्तवती अस्ति?'' इति।

''अथ किम्? यदि अपेक्ष्यते तर्हि भवान् स्वयं परीक्षां कर्तुम् अर्हति'' इति उक्तवान् जयसेनः।

''अस्तु तर्हि। श्वः रात्रौ भवतः गृहम् आगमिष्यामि। भवतः आतिथ्यं प्राप्य भवतः पुत्र्याः चतुरङ्गक्रीडानैपुण्यस्य परीक्षाम् अपि करिष्यामि'' इति हसन् उक्तवान् महाराजः।

''अनुगृहीतोऽस्मि'' इति उक्तवान् जयसेनः। स्ववचनस्य अनुगुणं राजा



जयसेनस्य गृहं गत्वा शक्तिसेनया सह चतुरङ्गक्रीडां क्रीडितवान्।

महता चातुर्येण अश्वादीनि क्रीडासाधनानि चालयन्ती शक्तिसेना अल्पेन एव प्रयासेन महाराजं त्रिवारम् अपि पराजितं कृतवती।

शक्तिसेनायाः बुद्धिमत्तां क्रीडानैपुण्यं च दृष्ट्वा राजा नितराम् आश्चर्यचकितः। नयनमनोहरं तस्याः अपूर्वं सौन्दर्यं दृष्ट्वा तु सः नितराम् आकृष्टः जातः।

अनन्तरं राजा जयसेनस्य आतिथ्यं स्वीकुर्वन् - "जयसेन! बुद्धिमतीं रूपवतीं च शक्तिसेनां पुत्रीत्वेन प्राप्तवन्तं भवन्तम् अभिनन्दामि। किन्तु मम तु आशयः यत् यदि सा पुत्रः अभविष्यत् तर्हि वरम् अभविष्यत्" इति हसन् उक्तवान्।

तदा जयसेनः उक्तवान् - "भवतः आशयं न अङ्गीकरोमि अहम्। मम पुत्री शस्त्रे शास्त्रे च अद्वितीया अस्ति। कोऽपि पुरुषः एतस्याः तुल्यतां प्राप्तुं न अर्हति। वीराधिवीराः इति ये लोके ख्याताः तान् अपि पराक्रमेण अतिशेते मम पुत्री। अतः सा स्त्री चेदपि अभिमानास्पदम् एव अस्ति" इति।

एतत् श्रुत्वा किञ्चिदिव असन्तुष्टः राजा - "एवं तर्हि मम पुत्रस्य कीर्तिसिंहस्य अपेक्षया अपि भवतः पुत्री शक्तिसेना एव श्रेष्ठा इति खलु भवतः अभिप्रायः?" इति पृष्टवान्।

स्वस्य कथनम् एवं राज्ञः असन्तोषाय भवेत् इति, कष्टकरस्य प्रश्नस्य कारणं भवेत् इति वा न ऊहितम् आसीत् जयसेनेन। अतः 'किम् उत्तरं वक्तव्यम्?' इति चिन्तयन् क्षणकालं मौनं स्थितवान् सः। तदा राजा पुनः उक्तवान् - "मित्र! अलं चिन्तया। भवतः पुत्र्याः श्रेष्ठत्वम् अङ्गीकर्तुं सिद्धः अस्मि अहम्। किन्तु अङ्गीकारः भवद्वचनश्रवणमात्रेण न, अपि तु परीक्षणस्य अनन्तरं भवेत्। तदर्थम् एकां परीक्षाम् आयोजयिष्यामि अहम्। तस्यां सा यदि जयं प्राप्नुयात् तर्हि ताम् अहं मम स्नुषां करिष्यामि। यदि सा अनुत्तीर्णा भवेत् तर्हि तां पुत्रीत्वेन भावयन् योग्यं वरम् अन्विष्य तस्याः विवाहं निर्वर्तयिष्यामि" इति।

अनन्यगतिकः जयसेनः प्रतिवचनं किमपि वक्तुम् अशक्नुवन् अङ्गीकारपूर्वकं शिरः चालितवान्। तदा राजा उक्तवान् -



"मित्र ! मम परीक्षायाः स्वरूपं शृणोतु तावत् । मम पुत्रः युवराजः कीर्तिसिंहः अस्मद्देशस्य उत्तरस्यां दिशि पर्वतप्रदेशे स्थिते कृष्णचन्द्रवर्यस्य गुरुकुले विद्याभ्यासं कुर्वन् अस्ति । तस्य विद्याभ्यासः सद्यः एव समाप्तः । सः आगामिन्यां कृष्णप्रथमायाम् एकाकितया प्रस्थाय राजधानीं प्रत्यागमिष्यति । भवतः पुत्री मार्गे तेन मिलित्वा तं पूर्वस्यां दिशि स्थितम् अरण्यं नयेत् । तस्मिन् अरण्ये प्राचीनं शक्तिमन्दिरम् अस्ति इति भवान् जानीयात् एव । तस्मिन् देवालये मम पुत्रं त्रीणि दिनानि यावत् बन्धने स्थापयेत् भवतः पुत्री । यदि सा एतत् कर्तुं समर्था भवेत् तर्हि ताम् अहं स्नुषां कुर्याम् । किन्तु अत्र अयं नियमः यत् एतत्सर्वं तया एकाकिन्या करणीयम् । अन्यसाहाय्यं कदापि न स्वीकरणीयम् । युवराजः अन्यत्र कुत्रापि न नेतव्यः । अन्यत्र बन्धने न स्थापनीयः । शक्यते वा एतत् ?" इति ।

राज्ञा उक्तं परीक्षास्वरूपं श्रुतवतः जयसेनस्य मुखं कान्तिहीनं जातम् । सः दिग्भ्रान्तः आसीत् ।

क्षणद्वयस्य मौनस्य अनन्तरं जयसेनः आसनात् उत्थाय राज्ञः हस्तौ दृढं गृहीत्वा - "महाराज ! पुत्रीविषयकेण अभिमानेन मया यत् उक्तं तदर्थं क्षमां प्रार्थये । करौ योजयित्वा भवन्तं निवेदयामि यत् मम पुत्रीम् एतादृश्यां कठिनपरीक्षायां न योजयतु इति । कृपया मयि कृपां प्रदर्शयतु" इति प्रार्थितवान् ।

तदा महाराजः गम्भीरस्वरेण - "एवं वा स्थितिः ? भवतः पुत्रीम् अत्र आनाययतु तावत्" इति उक्तवान् ।

जयसेनः पुत्रीम् आनायितवान् । महाराजः तां सर्वं स्वयं निवेद्य - "वत्से ! भवतः पितुः पुत्र्यां भवत्यां विशेष-व्यामोहः । सः भवत्याः अल्पं कष्टम् अपि सोढुं न सिद्धः । अतः भवतीं पृच्छामि - किं भवती एतां परीक्षां सम्मुखीकर्तुं सिद्धा ?" इति पृष्टवान् ।

शक्तिसेना विनयेन - "अहं सिद्धा अस्मि" इति उक्तवती । पुत्र्याः अङ्गीकारवचनं श्रुत्वा जयसेनः दिग्भ्रान्तः । महाराजः तु मन्दहासपूर्वकं जयसेनसमीपम् आगत्य तस्य स्कन्धं मृदु प्रहृत्य प्रासादं प्रति गतवान् ।



महाराजस्य निर्गमनस्य अनन्तरं शक्तिसेना पितुः समीपम् आगत्य - "तात! एतद्विषये तावत् चिन्तनीयं किम् अस्ति ? अस्थाने भीतिः किमर्थं भवतः ?" इति पृष्टवती।

पुत्र्याः वचनं श्रुत्वा किञ्चिदिव क्रुद्धः जयसेनः उद्वेगेन - "वत्से ! इतः परं चिन्तनीयं किम् अस्ति इति ? हूँ, किं वा प्रयोजनं चिन्तनेन ? भवत्या तु अङ्गीकारः प्रदर्शितः एव । तथापि पिता सन् अहं कर्तव्यबुद्धया किञ्चित् वदामि। कीर्तिसिंहः कीदृशः इति अहं सम्यक् जानामि। तत्रापि महागुरोः कृष्णचन्द्रस्य प्रीतिपात्रं शिष्यः आसीत् सः । अतः राजनीतौ, लौकिकव्यवहारे, युद्धविधायां च अद्वितीयः जातः अस्ति सः। एवं स्थिते तस्य वचनम्, अन्यत्र नयनम् इत्यादिकं किं शक्येत ? तत्रापि एकाकिन्या करणीयम् एतत् ! अविचिन्त्य अङ्गीकारं सूचयन्त्या भवत्या महती मूर्खता अनुष्ठिता" इति उक्तवान्।

पितुः वचनं श्रुत्वा अपि धैर्यच्युतिम् अप्राप्नुवती शक्तिसेना - "तात ! एतत्सर्वं महाराजः जानाति एव खलु ? जानता अपि तेन एषा परीक्षा निर्दिष्टा। अतः अहम् एव भवन्तं पृच्छामि - महाराजः जानन् अपि एतादृशीं कठिनपरीक्षां किमर्थं निर्दिष्टवान् ?" इति पृष्टवती।

जयसेनः पुनरपि उद्वेगेन उक्तवान् - "भवती शक्तिमती इति अभिमानेन गर्वेण च अहम् आसं यत् तत् निवारयितुम् एव महाराजस्य एतत् तन्त्रम्" इति।

तदा शक्तिसेना हसन्ती उक्तवती - "तात! अतिप्रीतिः अधिकव्यामोहः वा पापाशङ्कां वर्धयति इति प्राज्ञाः वदन्ति। भवतः अपि तादृशी एव स्थितिः । ज्येष्ठाः कनिष्ठानां सामर्थ्यं ख्यापयितुं सर्वदा प्रयत्नं कुर्वन्तः भवन्ति। परीक्षाद्वारा एव सामर्थ्यं प्रकाशितं प्रमाणितं च भवति। असाध्ये कार्ये योजनम् अपि परीक्षाद्वारा शक्यते एव। तादृशः प्रयत्नः परीक्षकस्य अपमानाय अपकीर्त्यै च भवति। किन्तु राजा तादृशः अधमः तु सर्वथा न। अस्माकं हितेच्छुः सः। अतः केनचित् विशिष्टेन उद्देशेन एव राज्ञा एषा परीक्षा सूचिता स्यात्। राज्ञः आन्तर्यं न ज्ञायते इत्यतः एषः उद्वेगः भवतः। मम तु एवं भाति

यत् अत्र उद्वेगः प्राप्तव्यः नास्ति इति। धैर्यस्य अवलम्बनम् एव इदानीम् उचितः मार्गः इति'' इति।

पुत्र्याः वचनम् आश्चर्येण शृण्वन् जयसेनः - ''वत्से ! महाराजः अधमः न इति, अस्माकं हितेच्छुः एव सः इति च अहं जानामि एव। महाराजः अस्मदीयः एव'' इति स्वगतम् इव वदन् आसनात् उत्थाय चिन्तनं कुर्वन् इतस्ततः सञ्चारं कृतवान्।

किञ्चित्कालानन्तरं जयसेनः शिरः उन्नीय पुत्रीं प्रीत्या पश्यन् - ''वत्से! भवत्याः कथनं युक्तम् एव अस्ति'' इति उक्त्वा दीर्घं निश्श्वस्य पुनः उक्तवान् - ''मया यथा चिन्तितं तथैव राज्ञः चिन्तनम् अपि स्यात् इति भावयामि अहम्। अतः मया एतद्विषये किञ्चित् वक्तव्यम् अस्ति। श्रद्धया शृणोतु तावत्'' इति।

ततः सः कथनम् अनुवर्तितवान् -

''इदनीम् अस्माकं राज्ञः सुषेणस्य च यः स्नेहः अस्ति सः प्राचीनकालात् एव अनुवृत्तः अस्ति। अस्माकं पूर्वजाः कोसलराजानाम् आप्तमित्राणि आन्तरङ्गिकमार्गदर्शकाः च सन्तः जीवितवन्तः। मम पितामहस्य प्रपितामहः अपि राज्ञः सहायकः आसीत्। तस्य नाम अपि जयसेनः इत्येव। सः प्रज्ञावान् विविधविद्यापारङ्गतः च आसीत्। मन्त्रतन्त्रविद्यायां सः करतलामलकतां प्राप्तवान् आसीत्। तम् अतिशेतुं समर्थः अन्यः मन्त्रतन्त्रज्ञः तत्काले कोऽपि न आसीत्।

तदा महाराजः विचित्रवर्मा राज्यं पालयति स्म। मन्त्रशास्त्रे तस्य





विशेषाभिरुचिः आसीत् । तस्मिन् शास्त्रे सामान्यपरिणतिः अपि आसीत् तस्य । मत्पितामह-प्रपितामहस्य जयसेनस्य मन्त्रशास्त्रनैपुण्यं ज्ञात्वा राजा तदीयं स्नेहं सम्पाद्य तम् आन्तरङ्गिक-मार्गदर्शकस्थाने नियोजितवान् आसीत् । सकलशास्त्र-पारङ्गतस्य धर्ममूर्तेः स्नेहस्वरूपस्य महाराजस्य विचित्रवर्मणः स्नेहः जयसेनस्य अपि प्रियः आसीत् । अल्पे एव काले तौ परमात्मीयौ जातौ । तयोः स्नेहः एतावत् प्रवृद्धः यत् तौ परस्परयोः निमित्तं प्राणान् अपि समर्पयितुं सिद्धौ आस्ताम् ।

जयसेनेन ज्ञातायाः मन्त्रविद्यायाः साहाय्येन राजा जयसेनश्चापि अदृश्यतां प्राप्य राज्ये सञ्चरन्तौ प्रजानां सुख-दुःखादिकं जानीतः स्म । चोरान् दुष्टान् च गृहीत्वा तौ दण्डयतः स्म । विपद्ग्रस्तानां साहाय्यम् आचरतः स्म ।

राज्ञः प्रजापालनविचक्षणतायाः धर्मप्रियतायाः च कारणतः कोसलदेशः समृद्धिं गतः आसीत् । प्रजाः च सुखेन सन्तोषेण च आसन् । दुष्टाः चोराः च राज्ञः नामस्मरणात् एव भीताः भवन्ति स्म ।

कदाचित् जन्मदिनं निमित्तीकृत्य जयसेनः महाराजाय एकं मौक्तिकहारम् उपायनीकृतवान् । सः हारः न हि सामान्यः । मन्त्रशक्तिभिः युक्तानि मौक्तिकानि तत्र योजितानि आसन् । नवरत्नखचितम् एकं पदकम् अपि योजितम् आसीत् तस्मिन् ।

सामान्यः इव दृश्यमाने तस्मिन् हारे त्रिविधाः शक्तयः निहिताः आसन् । यः तं हारं धरति सः अपेक्षायां सत्यां अदृश्यतां प्राप्य सञ्चारं कर्तुं शक्नोति स्म इति तु हारस्य प्रथमं वैशिष्ट्यम् । पुरतः स्थितः जनः सत्यं वदति, उत असत्यम् इति ज्ञातुं शक्यते स्म इति तु हारस्य अपरं वैशिष्ट्यम् । तृतीयं वैशिष्ट्यं नाम यः तं हारं धरति सः भूमिस्थं निधिं दर्पणे इव स्फुटं द्रष्टुं शक्नोति स्म । एवं त्रिविधशक्तिभिः युक्तं तं हारं जयसेनः महाराजस्य निमित्तम् एव विशेषप्रयत्नेन सज्जीकृतवान् आसीत् ।

जयसेनेन उपायनीकृतस्य हारस्य वैशिष्ट्यं ज्ञात्वा महाराजः विचित्रवर्मा नितरां सन्तुष्टः । जयसेनस्य प्रीत्यतिशयं



स्मरतः तस्य हृदयं कृतज्ञताभावेन पूर्णम् अभवत्।

कानिचन दिनानि अतीतानि। जयसेनेन उपायनीकृतं हारं धृत्वा राजा विचित्रवर्मा मृगयार्थं कोसलस्य पूर्वस्तां दिशि स्थितम् अरण्यम् उद्दिश्य गतवान्। अनारोग्यकारणतः जयसेनः महाराजेन सह गन्तुं न शक्तवान् आसीत्।

सपरिवारं गतः राजा आदिनं मृगयाविहारं कृतवान्। रात्रौ अरण्ये एव शिबिरं निर्मितम्। तत्र महाराजः अन्ये च विश्रान्तिसुखम् अनुभूतवन्तः।

रक्षकभटेभ्यः ऋते अन्ये सर्वे निद्रायां लीनाः आसन्। महाराजेन तु निद्रा न प्राप्ता एव। मध्यरात्रसमये कश्चन अव्यक्तः भावः तस्मिन् उद्गतः। मानसिक्या अशान्त्या पीड्यमानः सः कयाचित् अव्यक्तया शक्त्या आकृष्यमाणः इव उत्थाय गम्यं स्थानं किमपि अजानन् एव ततः प्रस्थितवान्। महाराजस्य विचित्रव्यवहारस्य कारणम् अजानन्तः रक्षकभटाः आश्चर्यम् अनुभवन्तः महाराजम् अनुसृतवन्तः।


अन्ते कस्मिंश्चित् स्थले तिष्ठन् राजा भटान् आज्ञापितवान् यत् अत्र खननं कुर्वन्तु इति। भटाः दीपान् प्रज्वाल्य खनने उद्युक्ताः अभवन्। रात्रौ आरब्धं खननम् अनन्तरदिनस्य मध्याह्नं यावत् अनुवृत्तम्।

मध्याह्नसमये उन्नतः, कृष्णवर्णीयः, वज्रमयेन नासाभरणेन युक्तः कश्चन शक्तिविग्रहः तत्र प्राप्तः। देव्याः विग्रहं दृष्टवतः महाराजस्य महान् आनन्दः जातः। सः भटान् आज्ञापितवान् यत् एतं विग्रहं राजधानीम् आनयन्तु इति।

महाराजेन सह प्रह्लादः नाम मन्त्री आसीत्। सः राज्ञः आशयं निराकुर्वन् उक्तवान् - "प्रभो! आगमशास्त्रज्ञाः यदि अङ्गीकुर्युः तर्हि एव राजधानीं प्रति विग्रहस्य नयनं वरम्" इति।

राजा विचित्रवर्मा मन्त्रिणः सूचनां निराकर्तुम् अशक्नुवन् कांश्चन भटान् विग्रहरक्षणकार्ये नियोज्य राजधानीं प्रतिगतवान्। (अनुवर्तते)





कीर्तिसिंहकथा - २

(जयसेनः कोसलराजस्य सुषेणस्य आप्तमित्रम्। तस्य पुत्री कीर्तिसेना। कीर्तिसेनायाः सामर्थ्यस्य परीक्षां कर्तुम् इच्छन् राजा तां सूचितवान् यत् विद्याभ्यासं समाप्य प्रत्यागच्छन्तं युवराजं कीर्तिसिंहं भवती अरावलीपर्वतप्रदेशे देवालये बन्धने स्थापयेत् इति। कीर्तिसेना एतत् अङ्गीकृतवती। आरम्भे जयसेनः यद्यपि अत्र असम्मतिं प्रदर्शितवान्, तथापि अन्ते अङ्गीकृत्य स्वस्य पूर्वजानां विषयं तां बोधितवान्। वृद्धः जयसेनः विचित्रवर्मणे अपूर्वशक्तियुक्तं हारम् उपायनीकृतवान्। मृगयार्थं गतेन विचित्रवर्मणा भूगर्भे कश्चन शक्तिविग्रहः प्राप्तः। तद्विषये आगमशास्त्रज्ञैः सह समालोचनार्थं राजा राजधानीं प्रत्यागतवान्।)

राजा विचित्रवर्मा राजधानीं प्रत्यागत्य प्रथमं जयसेनं दृष्टवान्। राज्ञः मुखात् प्रवृत्तं सर्वं श्रुतवतः जयसेनस्य मनसि अपि अपूर्वः अव्यक्तः कश्चन आनन्दः उत्पन्नः।

ततः आगमशास्त्रज्ञाः आनायिताः। राजवंशस्य हितचिन्तकाः ज्येष्ठाः अपि मेलिताः। सर्वैः सह समालोचनम् आरब्धम्।

बहुधा चर्चां कृत्वा ग्रन्थादिकं च परिशील्य जयसिंहः अन्ये च राजानम् उक्तवन्तः - "इदानीं तस्य विग्रहस्य अन्यत्र नयनं न उचितम्। अतः तत्रैव मन्दिरं निर्माय विग्रहस्य प्रतिष्ठापनं करणीयम्। तस्याः देव्याः अनुग्रहः, विग्रहप्रतिष्ठापनात् प्राप्यमाणः लाभः वा यद्यपि भवता न प्राप्यते, तथापि भवदनन्तरजेषु केनचित्



वीरेण तु प्राप्यते एव । सः वीरः देव्याः अनुग्रहेण राज्यं विस्तारीकृत्य दक्षिणदेशानां सार्वभौमः भविष्यति । तस्य कीर्तिः सर्वासु दिक्षु प्रसृता भविष्यति । तस्य शासनकाले सर्वाः देवताः नित्यपूजां प्राप्स्यन्ति । तस्य परिणामतः तत्तद्देवताविग्रहेषु तासां सान्निध्यं व्यक्तं भविष्यति। देवतासम्बन्धिनः उत्सवाः रथयात्राः इत्यादयः तदा काले काले भविष्यन्ति'' इति।

एतत्सर्वं श्रुत्वा विचित्रवर्मा ज्ञातवान् यत् मृगयासमये रात्रौ अवर्णनीयः आनन्दः अकस्मात् किमर्थं प्राप्तः इति । 'विग्रहप्राप्तिफलं देवतानुग्रहं च यद्यपि अहं प्राप्तुं न शक्नोमि, तथापि मद्वंशीयः कश्चित् तु प्राप्स्यति एव' इति ज्ञातवतः तस्य महान् सन्तोषः एव जातः। अनन्तरं सः योग्ये मुहूर्ते देव्याः विग्रहम् अरण्ये प्रतिष्ठापितवान् । देव्याः निमित्तम् आलयः चापि तेन तत्र निर्मितः।

किन्तु अरण्यस्थं तं देवालयं प्रति जनाः तु न गच्छन्ति स्म। गच्छता कालेन जनैः स च देवालयः सर्वथा विस्मृतः।

एतत्सर्वं दैवनिर्णयानुगुणं प्रचलति इति निर्णीय विचित्रवर्मा देवीं मनसा नमस्कुर्वन् मौनम् आश्रितवान्।

एवम् एव कानिचन वर्षाणि अतीतानि। हारस्य साहाय्येन विचित्रवर्मा भूमिस्थं निधिं ज्ञात्वा बहिः आनीतवान्। तं प्रजाहितकार्येषु विनियुक्तवान् । न्याय्येन मार्गेण सः राज्यपालनं करोति स्म। हारवार्ता आरम्भे यद्यपि रहसि आसीत्, किन्तु दिनेषु गतेषु सा वार्ता सर्वत्र प्रसृता। विदेशीयराजैः अपि एषा वार्ता ज्ञाता।

दक्षिणापथे बलशाली सुभिक्षः च देशः कोसलदेशः । द्वितीयं स्थानं तु काम्बोजदेशस्य । काम्बोजदेशः कोसलस्य पूर्वभागे अस्ति । तयोः देशयोः मध्ये यत् सुविशालम् अरण्यं प्रसृतम् अस्ति तस्मिन् शक्तिदेव्याः आलयः अस्ति।


तत्काले काम्बोजदेशं चक्रादित्यः नाम राजा पालयन् आसीत्। तस्य स्वभावः तु उत्तमः आसीत्। किन्तु सः प्रजापालने दक्षः न आसीत्। अतः तस्य शासनकाले प्रजाः बहुविधानिकष्टानि अनुभवन्ति स्म । राज्ञः विचित्रवर्मणः उत्तमशासनस्य विषये,

कोसलदेशस्य प्रजानां सुखसौभाग्यविषये च काम्बोजदेशे बहुविधकथाः श्रूयन्ते स्म। अतः बहवः काम्बोजदेशीयाः कोसलदेशं गत्वा वासम् आरब्धवन्तः। कोसलदेशे तादृशानां वासार्थं कोऽपि आक्षेपः न आसीत्। अतः कोसलदेशं प्रति गन्तॄणां सङ्ख्या दिने दिने प्रवृद्धा।

एतस्मिन् एव कालखण्डे विचित्रवर्मा, जयसेनः, चक्रादित्यः चापि वृद्धाः जाताः। विचित्रवर्मणः ज्येष्ठः पुत्रः जयवर्मा परम्पराक्रमानुगुणं सिंहासनम् आरूढवान्। काम्बोजदेशे अपि चक्रादित्यस्य ज्येष्ठपुत्रेण सिंहासनम् आरोढव्यम् आसीत्। किन्तु सः असमर्थः व्यवहारे अनिपुणः च आसीत् इत्यतः तस्य अनुजः वरुणदत्तः पितरम् अग्रजं च कारागारे स्थापयित्वा राज्याधिकारं स्वायत्तीकृतवान्।

अदक्षस्य चक्रादित्यस्य शासनात् असन्तुष्टाः प्रजाः वरुणदत्तस्य सिंहासनारोहणं स्वागतीकृतवत्यः।

वरुणदत्तस्य सामर्थ्यं यद्यपि अधिकं, तथापि तस्मिन् गुणाः न्यूनाः। असूया-द्वेष-कोपादीनां दासः सः। प्रजानां मुखात् कोसलराज्यस्य प्रशंसां श्रुतवान् आसीत् सः। प्रजाः काम्बोजं परित्यज्य कोसलम् श्रयन्त्यः सन्ति इति जानतः तु तस्य असूया कोपः च प्रवृद्धः। 'जयसेनेन उपायनीकृतस्य हारस्य कारणतः एव कोसलराज्यस्य शासनम् उत्तमम् अस्ति' इति वरुणदत्तस्य दृढः विश्वासः आसीत्।




अतः सः तस्य हारस्य वशीकरणार्थम् उपायं चिन्तितवान्।

जयवर्मा गुणवान् समर्थः चापि। किन्तु तस्मिन् विलासप्रियता अधिका। चित्रविचित्राणां विलासमन्दिराणां निर्माणं, देशविदेशेभ्यः समागतानां नटनर्तकीनां नाट्यादिकार्यक्रमं व्यवस्थाप्य यथायोग्यम् उपायनदानम् इत्यादयः तस्य प्रीतिपात्राणि कार्याणि।

पुत्रस्य एतादृशं व्यवहारं दृष्ट्वा विचित्रवर्मा यद्यपि खेदं प्राप्नोति, तथापि 'उपदेशमात्रात् एतादृशी प्रवृत्तिः न त्यज्यते' इति जानन् सः मौनं तिष्ठति स्म।

जयवर्मणः एतां दुर्बलतां काम्बोजराजः वरुणदत्तः जानाति स्म। अतः स्वस्य इष्टस्य



साधनार्थं सः कनकलतानामिकां नर्तकीं चितवान्। सा परमसुन्दरी नृत्यकुशला च। सा अङ्गीकृतवती यत् चातुर्येण जयवर्मतः अपूर्वं हारं प्राप्य राज्ञे दत्त्वा राज्ञा दीयमानम् उपायनं स्वीकरिष्यामि इति।

महाराजः विचित्रवर्मा यद्यपि पुत्रस्य पट्टाभिषेकं कृतवान् आसीत् तथापि शासनव्यवहारे सर्वथा अनासक्तः तु न आसीत्। पुत्रस्य दौर्बल्यं सम्यक् जानन् सः, पुत्रः जयवर्मा अपि यथा न जानीयात् तथा रहसि एकं गूढचारदलं व्यवस्थापितवान् आसीत्। तच्च दलं तदा तदा तं सर्वाः वार्ताः निवेदयति स्म। एषा व्यवस्था वरुणदत्तेन सर्वथा न ज्ञाता आसीत्।

यस्मिन् दिने जयवर्मा सिंहासनम् आरूढवान् तस्मिन् एव दिने तम् अपूर्वं हारं तस्मै दत्तवान् आसीत् विचित्रवर्मा। सिंहासनारोहणसमये दत्तः स च हारः सर्वदा जयवर्मणः कण्ठे शोभते स्म।

वरुणदत्तेन प्रेषिता कनकलता यदा कोसलदेशे पदं स्थापितवती तदा एव विचित्रवर्मणा एषा वार्ता ज्ञाता। तस्याः आगमनात् सन्देहं प्राप्य विचित्रवर्मा पूर्वापरं समग्रं विचारितवान्। तदा तेन वरुणदत्तस्य कुतन्त्रं ज्ञातम्।

एतां वार्तां श्रुत्वा चिन्ताक्रान्तः विचित्रवर्मा जयसेनम् आनाय्य तेन सह समालोचनं कृतवान्। उभौ अपि सम्भूय प्रतितन्त्रं निर्मितवन्तौ।

तदनुगुणम् अपूर्वहारसदृशः अपरः कृत्रिमः हारः दिनाभ्यन्तरे सिद्धः जातः। विश्वासार्हजनद्वारा स च हारः जयवर्मणः कण्ठे अतिष्ठत्। वास्तविकः अपूर्वहारः विचित्रवर्मणः कण्ठम् अभूषयत्।

ततः केषुचित् एव दिनेषु कनकलता हावभावादिभिः चातुर्येण च राजानं वशीकृतवती। कनकलतायाः नृत्यं दृष्ट्वा नितरां सन्तुष्टः राजा जयवर्मा स्वकण्ठस्थं मुक्ताहारं कनकलतायाः कण्ठे स्थापितवान्। तस्मिन् दिने मध्यरात्रे कनकलता ततः निर्गतवती।

आत्मना कृतम् अक्षम्यम् अपराधं ज्ञात्वा जयवर्मा पश्चात्तापम् अनुभवन् पितुः समीपं धावितवान्।

यदा सः आगतः तदा विचित्रवर्मा






आत्मीयेन मित्रेण जयसेनेन सह चतुरङ्गक्रीडायां निमग्नः आसीत्। जयसेनः अपि राजकुटुम्बस्य सदस्यः इव एव आसीत् इत्यतः तयोः पुरतः आत्मना कृतम् अपराधं निस्सङ्कोचं निवेद्य - 'हारस्य प्रतिप्राप्त्यर्थम् इदानीम् उपायः कोऽपि चिन्तनीयः' इति उक्तवान् जयवर्मा।

सर्वं श्रुत्वा दीर्घं निःश्वस्य विचित्रवर्मा - ''वत्स ! अलं चिन्तया। सः हारः यावत् अस्मद्वंशीयानाम् अधीनः भवति तावत् तस्य महिमा तिष्ठति। यदि सः अन्यस्य हस्तं गच्छति तर्हि स्वयं महिमहीनः भविष्यति। तेन अस्माकं न काऽपि हानिः। अतः इदानीं मौनं स्थितिः एव वरम्'' इति पुत्रम् उक्तवान्।

एतत् वचनं श्रुत्वा जयवर्मा जयसेनश्चापि नितराम् आश्चर्यचकितौ। 'हारः अन्यस्य लाभाय न भवति' इति ज्ञातवतः जयवर्मणः चिन्ता तु अपगता। किन्तु 'मत्कारणतः स च अपूर्वः हारः हस्तच्युतः अभवत्' इति खेदः तु तस्य अन्तरङ्गे आसीत् एव। सः पितरं किमपि वक्तुम् उद्युक्तः।

तदा विचित्रवर्मा एव पुनः उक्तवान् - ''रसिकहृदयाः राजानः कलाभिमानेन कलाविदां कौशलदर्शनेन च सन्तोषं प्राप्य यथायोग्यं सत्कारं कुर्युः। किन्तु न कदापि आत्मविस्मृतिं प्राप्नुयुः, न वा अनुचितकार्यं कुर्युः। कनकलताप्रसङ्गात् भवता एषः विषयः स्वयं ज्ञातः स्यात् अपि। तथापि कर्तव्यबुद्ध्या अहं वदन् अस्मि। राजा सदापि प्रजानां हितार्थं मनः केन्द्रीकुर्यात्, न तु स्वसुखार्थम्। कमलदलस्थं जलम् इव व्यवहरन् सः विलाससुखम् अनुभवेत्। एषः राज्ञः धर्मः। अस्तु तावत्, यत् प्रवृत्तं तद्विषये अधिकचिन्ताम् अकुर्वन् भवान् कर्तव्ये मनः प्रवर्तयतु'' इति।

जयवर्मा पश्चात्तापं खेदं च अनुभवन् शिरः अवनमय्य मौनं ततः निर्गतवान्। तस्य निर्गमनानन्तरं जयसेनस्य मुखे दृश्यमानं प्रश्नभावम् अवगच्छन् उक्तवान् विचित्रवर्मा - ''मित्र जयसेन ! मया किमर्थम् असत्यम् उक्तम् इति खलु भवतः प्रश्नः ? तस्य उत्तरम् अनन्तरं कथयिष्यामि। ततः पूर्वं भवान् एव वदतु - जयवर्मतः तं हारं प्राप्तुम् आवां किमर्थं त्वरया योजनां कृतवन्तौ इति''



इति।

जयसेनः एतस्य उत्तरं किमपि अवदन् मौनं स्थितवान्।

तदा विचित्रवर्मा पुनः उक्तवान् - "यदि हारः जयवर्मणः कण्ठे तिष्ठेत् तर्हि सः नर्तक्याः कपटतां कुतन्त्रनिरततां च अवश्यं जानीयात् एव। तदा वञ्चनया हारस्य प्राप्तिः एव न अभविष्यत्। एतत्सर्वं काम्बोजराजः अपि जानाति एव। तथापि सः कार्यप्रवृत्तः आसीत्। अतः एव वयम् उपायेन जयवर्मकण्ठतः हारं दूरीकृतवन्तः। एतत्सर्वं किमर्थं प्रवृत्तम्? जयवर्मणः मनोदौर्बल्यात्, अविचिन्त्य व्यवहारात् च। मनोदौर्बल्यवान् कदाचित् विद्यमानायाः मेधाशक्तेः उपयोगम् अपि न करोति। अतीन्द्रियशक्तेः उपयोगं स्वीकर्तुम् अपि सः न अर्हति। अविवेकी अपि वरुणदत्तः एतम् अंशं सम्यक् अवगतवान् अस्ति। अतः एव सः कनकलताम् अत्र प्रेषयन् जयवर्मणः दुर्बलतां वर्धयित्वा हारं वशीकर्तुं प्रयत्नं कृतवान्" इति।

राज्ञः विचारम् अङ्गीकुर्वन् जयसेनः मौनं शिरः चालितवान्।

विचित्रवर्मा हसन् पुनः उक्तवान् - "यथा मम तथा भवतः अपि जयवर्मणि अधिकप्रीतिः अस्ति इति अहं जानामि। सकृत् अपराधं कृत्वा पश्चात्तापम् अनुभूय विवेकं प्राप्तवान् जयवर्मा इतः परं जागरूकतया एव व्यवहरिष्यति इति, अपूर्वः हारः तस्मै दत्तः चेत् न काऽपि हानिः इति च भवतः चिन्तनं स्यात्। किन्तु दिने दृष्टे कूपे रात्रौ न पतनीयम् इति मम अभिप्रायः। एतस्याः घटनायाः परिणामतः जयवर्मणि परिवर्तनं भवेत्, न भवेत् अपि। एवं स्थिते सकृत् कृतः दोषः पुनः किमर्थं करणीयः? इदानीं जयवर्मा वरुणदत्तः चापि निर्णीतवन्तौ स्तः यत् वास्तविकः अपूर्वहारः शक्तिहीनः जातः अस्ति इति। अतः तौ इतः परम् एतद्विषये कदापि न चिन्तयतः। एवं तर्हि हारः किं क्रियते इति प्रश्नः स्यात् भवतः मनसि। तदर्थम् अपि मार्गः चिन्तितः अस्ति मया। मद्वंशे कश्चन महात्मा जन्म प्राप्स्यति खलु? सः जयवर्मणः पुत्रः, पौत्रः, प्रपौत्रः, प्रपौत्रपुत्रः, तदनन्तरं जातः कश्चित् वा भवेत् नाम। सः एतस्य हारस्य, हारद्वारा

प्राप्यमाणायाः सम्पत्तेः च उत्तराधिकारी भविष्यति'' इति।

महाराजस्य राजनीतिनिपुणतां धर्ममार्गानुयायितां च मनसा अङ्गीकुर्वन् जयसेनः मौनं शिरश्चालनपूर्वकम् एतद्विषये अङ्गीकारं सूचितवान्।


विचित्रवर्मणा यथा ऊहितं तथैव प्रवृत्तम् । 'अपूर्ववैशिष्ट्यशाली हारः शक्तिहीनः जातः' इति वार्ता वरुणदत्तेन अपि प्राप्ता । 'अहो, दौर्भाग्यम् !' इति चिन्तयन्, 'अहो, मम तन्त्रं विफलं जातम्' इति महान्तं खेदं च अनुभवन् सः मौनम् आश्रितवान्।


प्रवृत्तस्य विषये नितरां खिन्ने जयवर्मणि महत् परिवर्तनं दृष्टम्। सः विलासमयजीवने क्रमशः आसक्तिं न्यूनीकुर्वन् कर्तव्येषु कार्येषु अधिकश्रद्धां प्रदर्शितवान् । कोसलदेशस्य प्रजाः तस्मिन् आदरवत्यः जाताः।

एतत् सर्वं दृष्ट्वा तृप्तिम् अनुभवन् विचित्रवर्मा केषाञ्चित् वर्षाणाम् अनन्तरं परलोकं गतवान् । ततः अल्पे एव काले जयसेनः अपि दिवं गतः।

स्वस्य मरणात् पूर्वं जयसेनः जयवर्माणम् एकान्ते दृष्ट्वा अपूर्वशक्तिशालिनः हारस्य विषये प्रवृत्तं समग्रं निवेद्य - ''वत्स ! भवति जातं सत्परिवर्तनं दृष्ट्वा अहं महाराजं तदा तदा वदामि स्म - हारः भवते दातव्यः इति। किन्तु न जाने किं कारणम् इति, महाराजः मम प्रार्थनां कदापि न अङ्गीकृतवान्। सः मां वदति स्म - 'मम निर्णयः उचितः इत्येव भाति मम। सः हारः मद्वंशीयेन केनचित् प्राप्यते एव। अतः जयवर्मणा स च हारः न प्राप्तः चेदपि राजवंशस्य हानिः तु सर्वथा न भवति। अतः अलं चिन्तया' इति। स च हारः कुत्र स्थापितः इति विषयः महाराजेन मरणकाले अपि न उक्तम् । मरणात् पूर्वम् एकं पत्रं लेखयित्वा मां सः उक्तवान् आसीत् यत् एतत् पत्रं भवतः मरणकाले मत्पुत्राय ददातु इति। तत् पत्रं स्वीकरोतु तावत्'' इति उक्त्वा एकां दन्तनिर्मितां पेटिकां जयवर्मणे दत्तवान् आसीत्।

- (अनुवर्तते)





कीर्तिसिंहकथा - ३

(विचित्रवर्मा भूगर्भतः प्राप्तं देव्याः विग्रहं पण्डितानाम् अभिप्रायानुगुणम् अरण्ये एव देवालयं निर्माय तत्र प्रतिष्ठापितवान्। केषाञ्चन दिनानाम् अनन्तरं विचित्रवर्मणः पुत्रः जयवर्मा सिंहासनम् आरूढवान्। तस्य समीपस्थम् अपूर्वं हारं वशीकर्तुम् इच्छन् काम्बोजस्य राजा वरुणदत्तः कुत्रन्त्रम् आचरन् तदर्थं काञ्चित् नर्तकीं प्रेषितवान्। वरुणदत्तस्य कुतन्त्रं ज्ञात्वा विचित्रवर्मा उपायेन तं हारं रक्षितवान्। किन्तु एतं विषयं जयवर्मा न जानाति। विचित्रवर्मणः मरणानन्तरं तेन लिखितं पत्रमेकम् आनीय जयसेनः जयवर्मणे दत्तवान्।)

जयसेनस्य वचनं श्रुत्वा जयवर्मा दीर्घं निःश्वस्य - "अत्र पितुः दोषः कोऽपि नास्ति। मद्विषयकं तस्य विश्वासं रक्षितुं न शक्तः अहम्। भवतु, चिन्ता नास्ति। मम पिता तम् अपूर्वं हारं कस्मै अपि न दत्तवान् स्यात् खलु! तस्य हारस्य उत्तराधिकारी मम अपि उत्तराधिकारी एव खलु!" इति वदन् पेटिकातः पत्रम् उद्घाट्य पठितवान्।

पत्रे एवं लिखितम् आसीत् -

"वत्स! जय! मम व्यवहारेण भवान् खिन्नः न भवति इति मम विश्वासः अस्ति। तेन एव विश्वासेन अहम् अग्रिमं कार्यं निर्व्यूढवान्। सः अपूर्वहारः कुत्र स्थापितः अस्ति इति रहस्यं मां विना अन्यः कोऽपि न जानाति। जयसेनः अपि न जानाति। सः हारः कुत्र अस्ति इति भवतः ज्ञानार्थं केचन अंशाः केवलं मया उच्यन्ते।

जय! समस्तलोकैः अपि पूजनीया देवी



परमेश्वरी तु काचित् स्त्री । सा कं शरणं गतवती ? सः च कस्यां दिशि निवसति ? मानवानां जीवनाधारभूता पञ्चभूतेषु अन्यतमा च का ? पादमितेन परिमाणेन तस्याः परिमाणं कृतवान् जनः दातारं कियत् धनं प्रार्थितवान् ? वत्स ! अपूर्वहारप्राप्तियोगः यस्य अस्ति, सः एतेषां प्रश्नानाम् उत्तरं ज्ञास्यति । येन उत्तरं ज्ञायते सः केवलं लाभं प्राप्स्यति । सर्वं शुभं भवतु भवतः इति आशिषा अनुगृह्णन् भवदीयः पिता विचित्रवर्मा'' इति ।

पत्रं पठित्वा जयवर्मा सादरं तत् पत्रं नमस्कृत्य पुनरपि दन्तपेटिकायां स्थापितवान् । जयवर्मणः मरणानन्तरं बहवः तत् पत्रं पठित्वा भिन्नभिन्नप्रकारेण तस्य व्याख्यानं कृतवन्तः । परन्तु समीचीनः अर्थः केनापि न गृहीतः । अतः सः अपूर्वः हारः अपि केनापि न सम्पादितः । एवमेव पञ्च परम्पराः अतीताः । बहुधा चिन्तनेन अस्माकं महाराजस्य पिता चिन्तितवान् यत् - सः अपूर्वः हारः पूर्वस्यां दिशि अरण्यस्थे शक्तिदेवालये गुप्तरूपेण स्थापितः अस्ति इति । अनन्तरं च तत्र खननम् आरब्धम् अस्माकं महाराजस्य पित्रा । तस्मिन् समये विविधाः विघ्नाः उत्पन्नाः । अतः महाराजस्य पिता तं प्रयत्नं परित्यक्तवान् । अनन्तरकाले सिंहासनम् आरूढवान् अस्माकं महाराजः हारप्राप्त्यर्थं प्रयत्नं न कृतवान् एव'' इत्युक्त्वा किञ्चित् कालं विश्रम्य जयसेनः पुनरपि वक्तुम् आरब्धवान् - ''यदि तम् अपूर्वं हारं मम पुत्रः एव प्राप्नुयात् तर्हि वरम् इति महाराजस्य आशयः । भवत्याः मेधाशक्तिविषये महाराजस्य महान् विश्वासः अस्ति । कीर्तिसिंहः अपि बुद्धिमान् । पूर्वदिशि स्थिते अरण्यस्थे शक्तिदेवालये कीर्तिसिंहस्य बन्धनं भवत्या करणीयम् इति महाराजः साग्रहं वदन् अस्ति यत् तेन ऊहितुं शक्यते यत् तस्य आशयः एवमेव स्यात् इति'' इति ।

पितुः वचनं श्रुत्वा शक्तिसेना अङ्गीकारपूर्वकं शिरः चालयन्ती उक्तवती - ''तात ! विषयं गूढशैल्या वदता महाराजेन मम प्रथमा परीक्षा आयोजिता इति भाति'' इति ।

तदा जयसेनः हसन् - ''एतस्यां



प्रथमपरीक्षायां भवती तु उत्तीर्णा एव खलु ?'' इति पृष्टवान्।

शक्तिसेना मन्दहासं प्रकटय्य मौनं स्थितवती।

अनन्तरदिने जयसेनः राजप्रासादस्य मुख्यद्वारसमीपं यदा गतवान्, तदा तत्रत्याः भटाः तम् उक्तवन्तः यत् महाराजः भवन्तं प्रतीक्षमाणः अस्ति इति। तत् श्रुत्वा जयसेनः अनुक्षणं महाराजं द्रष्टुं गतवान्। मन्दहासपूर्वकं महाराजं नमस्कृतवान् च।

तदा महाराजः जयसेनं पृष्टवान् - ''जयसेन ! भवतः पुत्रीम् एकाकितया प्रेषयितुं भवान् अङ्गीकृतवान् खलु!'' इति।

महाराजस्य एतत् वचनं श्रुत्वा जयसेनः सङ्कोचम् अनुभवन् उक्तवान् - ''प्रभो ! शक्तिसेनाविषये अधिकवात्सल्यं प्रदर्शयता पित्रा च सता मया ह्यः किञ्चिदिव अधिकं भाषितं भवता सह। किन्तु भवतः गमनानन्तरं शक्तिसेनया सह वार्तालापं कृत्वा भवतः आशयं ज्ञातवान् अहम्। मम पुत्री शक्तिसेना शुक्लचतुर्दश्याम् एव प्रस्थाय मध्येमार्गं राजकुमारेण मिलित्वा स्वकीयं कार्यं निर्वक्ष्यति'' इति।

तदा सुषेणः सगाम्भीर्यम् उक्तवान् - ''जयसेन! भवान् मम आशयं ज्ञातवान् इति तु मम महान्तं सन्तोषं जनयति। किन्तु किमर्थं मया त्वरा क्रियते इत्यपि वदामि। शृणोतु तावत् -

''मम पूर्वजः जयवर्मा यद्यपि अपूर्वं हारं न प्राप्तवान्, तथापि उत्तमरूपेण राज्यपालनं कृतवान्। अतः एव दक्षिणे कोसलः समृद्धः जातः। काम्बोजे वरुणदत्तः राज्यस्य उन्नतिं साधयितुम् इच्छन् अपि विवेकहीनतया व्यवहृतवान् इति कारणतः काम्बोजस्य अभिवृद्धिः मन्दगत्या प्राचलत्। वरुणदत्तस्य जीवितावधेः अन्तिमदिनेषु सः गूढचराणां द्वारा ज्ञातवान् यत् - नर्तक्याः द्वारा अपहृतः हारः कृत्रिमः, वास्तविकः अपूर्वहारः वृद्धराजेन कुत्रापि रहस्येन स्थापितः अस्ति इति। अनन्तरं सः दिवङ्गतः। किन्तु अनन्तरकालीनाः काम्बोजराजाः एतं विषयं ज्ञात्वा कोसलदेशेन सह शत्रुत्वं साधयन्तः सन्ति। शक्त्या युक्त्या वा सः अपूर्वहारः प्राप्तव्यः इति काम्बोजराजानां चिन्तनम्। किन्तु हारः कुत्र अस्ति इति कोसलराजाः एव




न जानन्ति इति कारणतः अद्यपर्यन्तं किमपि कर्तुम् अशक्ताः जाताः ते।

प्रकृतं वरुणदत्तस्य उत्तराधिकारी गरुडदत्तः काम्बोजं पालयन् अस्ति। गरुडदत्तः हारविषये पितुः अपेक्षया पितामहस्य अपेक्षया च दुराग्रहपीडितः अस्ति इति वार्ता अस्माकं गूढचराणां द्वारा ज्ञाता अस्ति। न केवलं तावत्, हारः न प्राप्यते चेत् हारः कुत्र अस्ति इति विषये विचित्रवर्मणा लिखितं पत्रं वा प्राप्तव्यम् इति चिन्तयन् अस्ति गरुडदत्तः। पत्रस्य वशीकरणार्थं गरुडदत्तेन प्रेषिताः द्वित्राः गुप्तचराः अस्माभिः बद्धाः। एतत् ज्ञात्वा कुपितः गरुडदत्तः कुतन्त्रम् आचरितुं यतमानः अस्ति। तस्य कुतन्त्रं कीदृशं स्यात् इति इतोऽपि न ज्ञातम् अस्माभिः। एवं स्थिते 'यावच्छीघ्रं सः हारः अस्माभिः प्राप्तव्यः। अनन्तरं काम्बोजस्य आक्रमणं करणीयम्' इति मम आशयः। अतः एव - 'महानुभावेन कृष्णचन्द्रेण युवराजस्य कीर्तिसिंहस्य प्रयाणार्थं यः मुहूर्तः निश्चितः सः एव मुहूर्तः एतस्य महत्कार्यस्य शुभारम्भाय अपि भवतु। तदनुसारं च कृष्णचन्द्रस्य गुरुकुलात् प्रस्थितः कीर्तिसिंहः पूर्वदिशं प्रति नेतव्यः' इति चिन्तितं मया। भवतः पुत्र्याः चातुर्यं बुद्धिमत्तां च ज्ञात्वा अहं चिन्तितवान् यत् शक्तिसेना कीर्तिसिंहस्य सहपथिका भवतु इति। इदानीं भवतः संशयः परिहृतः इति भावयामि'' इति।

एतत् श्रुत्वा जयसेनः अङ्गीकारपूर्वकं शिरः चालयन् पृष्टवान् - ''प्रभो! युवराजः हारविषयं जानाति वा?'' इति।

तदा सुषेणः - ''पूर्वजानां हारः कश्चन अस्ति इति, स च कुत्रापि गुप्तरूपेण स्थापितम् अस्ति इति च जानाति युवराजः। ततोऽपि अधिकं विवरणं न जानाति'' इति वदन् स्ववस्त्रे रहस्यरूपेण स्थापितां काञ्चित् दन्तपेटिकां निष्कास्य जयसेनाय यच्छन् उक्तवान् - ''सर्वान् विषयान् पुत्रीं सविवरणम् उक्त्वा भवता सा वक्तव्या यत् - एषा दन्तपेटिका सुरक्षितं नीत्वा भवत्या युवराजाय कीर्तिसिंहाय दातव्या इति। अनन्तरं अग्रे किं करणीयम् इति तौ एव निर्णयं कुरुतः'' इति।

अनन्तरं जयसेनः ततः गतवान्।





तस्मिन् दिने रात्रौ बहुकालं यावत् सुषेणः निद्राम् एव न प्राप्तवान्। एतत् ज्ञात्वा महाराज्ञी वैष्णवीदेवी सातङ्कः निद्रायाः अप्राप्तेः कारणं पतिं पृष्टवती।

तदा महाराजः विषयं गोपयितुम् अनिच्छन् शक्तिसेनाविषयं महाराज्ञीं निवेद्य उक्तवान् - "पित्रा अत्यन्तं प्रीत्या पालितां तरुणीम् एकाकितया प्रेषयन् अस्ति इति यत् तद्विषये न कापि चिन्ता मम। सर्वकार्येषु अपि शक्तिसेना समर्था अस्ति। किन्तु यदि सा जयं प्राप्नोति, तर्हि तां मम स्नुषात्वेन स्वीकरोमि इति मया वचनं दत्तम् अस्ति। शक्तिसेनाविषये कीर्तिसिंहस्य अभिप्रायः कः इति न जानामि अहम्। कीर्तिसिंहः यदि तां न इच्छति, तर्हि किं करोमि अहम्? वृथा शक्तिसेनायाम् आशाम् उत्पादितवान् वा अहम् इति चिन्ता मम" इति।

पत्युः वचनं श्रुत्वा वैष्णवीदेवी हसन्ती उक्तवती - "आकाशस्य राजा राज्ञी च कौ? वदतु" इति।

अप्रस्तुतं किमपि वदन्तीं पत्नीम् आश्चर्येण पश्यन् महाराजः पृष्टवान् - "किमर्थम् अस्मिन् सन्दर्भे एषः प्रश्नः?" इति।

तदा अपि वैष्णवीदेवी मन्दहासपूर्वकम् एव उक्तवती - "सन्दर्भोचितः एव एषः प्रश्नः। एतस्य प्रश्नस्य समाधानम् आवयोः पुत्रः, तस्य भाविनी पत्नी च केवलं जानीतः" इति।

"कीर्तिसिंहस्य भाविनी पत्नी वा? का सा?" इति आश्चर्येण पृष्टवान् सुषेणः।

तदा वैष्णवीदेवी उक्तवती - "अन्या का स्यात्? शक्तिसेना एव। प्रभो! शक्तिसेना कीर्तिसिंहस्य बाल्यसखी इति विषयः विस्मृतः वा भवता? कीर्तिसिंहः इदानीम् अपि शक्तिसेनां स्मरति। अहं यदा यदा कीर्तिसिंहं द्रष्टुं गुरुकुलं गच्छामि स्म, तदा तदा सः शक्तिसेनायाः योगक्षेमं विचारयति स्म सः। शक्तिसेना अपि भवतः वचनम् अङ्गीकृतवती यत् तस्य कारणं कीर्तिसिंहः एव। भवान् चिन्तां मा करोतु। शक्तिसेना एव आवयोः स्नुषा भविष्यति" इति।

महाराज्ञ्याः वचनं श्रुत्वा सुषेणस्य आतङ्कः परिहृतः जातः। अनन्तरं सः राज्ञीम् उद्दिश्य - "आकाशस्य राजा राज्ञी च कौ इति भवत्या पृष्टं खलु! तस्य उत्तरं न ज्ञातं मया"

इति उक्तवान्।

तदा वैष्णवीदेवी मन्दहासपूर्वकम् उक्तवती - ''एतस्य प्रश्नस्य उत्तरं भवान् भाविनीं स्नुषाम् एव पृष्ट्वा जानातु'' इति।

अनन्तरं सुषेणः निरातङ्कं निद्रां कृतवान्।

अत्र कोसले सुषेणस्य चिन्तनम् एवं प्रचलति सति, तत्र काम्बोजे गरुडदत्तः कुतन्त्रप्रकारान् चिन्तयन् आसीत्। अस्मिन् सन्दर्भे तस्य कुतन्त्रचिन्तनक्षेत्रम् अपरौ द्वौ प्रविष्टवन्तौ। तयोर्मध्ये एकः नगदेशस्य राजा नागकर्णः। नागकर्णः गरुडदत्तस्य श्यालः अपि। द्वितीयः चाक्यदेशस्य राजा कुण्डिनवर्मा।



गरुडदत्तः गुप्तचराणां द्वारा कुतन्त्रं कुर्वन् अपि द्वित्रवारम् अपजयं प्राप्तवान् आसीत्। अतः सः - 'इदानीम् अन्येषाम् अपि केषाञ्चन साहाय्यं प्राप्य सः हारः कथमपि वशीकरणीयः' इति चिन्तितवान् आसीत्। तदर्थं सः प्रथमं श्यालं नगदेशाधिपतिं नागकर्णं सम्पृक्तवान्। नागकर्णः विषयं ज्ञात्वा गरुडदत्तं सूचितवान् - 'मम स्नेहितः चाक्यदेशस्य राजा अपि एतादृशविषये उत्सुकः अस्ति। अन्यच्च तस्य प्रभूतं भिल्लसैन्यम् अपि अस्ति। अतः भवान् तम् अपि सकृत् पश्यति चेत् वरम्'' इति।

गरुडदत्तः एतत् अङ्गीकृतवान्।

अनन्तरं कदाचित् उत्सवसमये नागकर्णः कुण्डिनवर्मा गरुडदत्तः च काम्बोजे मिलित्वा केन प्रकारेण हारः वशीकरणीयः इति विषयम् अधिकृत्य समालोचनम् आरब्धवन्तः।

ते चिन्तितवन्तः यत् हारः गरुडदत्तेन स्वीकरणीयः। नागकर्णः कुण्डिनवर्मा च कोसलदेशं समभागेन विभज्य स्वीकुर्याताम् इति। किन्तु तेषु एकैकोऽपि मनसि एव निर्णीतवान् - 'अन्यौ उभौ अपि वञ्चयित्वा हारः कोसलदेशश्च वशीकरणीयः' इति। अनन्तरं ते त्रयः अपि कोसलस्य स्वायत्तीकरणविषयं चर्चितवन्तः।

''अस्माकं त्रयाणां सैन्यशक्तिः यावती अस्ति, तावती सैन्यशक्तिः कोसलस्य एकस्य एव अस्ति। एतद्विषये अस्माभिः गम्भीरतया चिन्तनीयम् अस्ति'' इति उक्तवान् नागकर्णः।

''न केवलं तावत्। श्वः कृष्णप्रतिपत्। श्वः कीर्तिसिंहः गुरुकुलात् राजधानीं प्रति गमिष्यति। अस्माकम् आक्रमणसमये कीर्तिसिंहः एव अस्मान् यदि सम्मुखीकरोति, तर्हि वयं सुलभतया कार्यं साधयितुं न शक्नुयाम'' इति उक्तवान् कुण्डिनवर्मा।

तयोः वचनं श्रुत्वा गरुडदत्तः पृष्टवान् - ''तर्हि सः कीर्तिसिंहः पूर्वमेव मारितः चेत् कथम्?'' इति।

''तत् कथम्?'' इति उभौ अपि कुतूहलेन पृष्टवन्तौ।


तदा गरुडदत्तः उक्तवान् - ''चतुरान् शक्तियुतान् त्रीन् भटान् प्रेषयाम वयम्। ते त्रयः भटाः वञ्चनया मध्येमार्गं कीर्तिसिंहं मारयिष्यन्ति। कीर्तिसिंहस्य मरणवार्तां श्रुत्वा कोसले सर्वे अपि शोकतप्ताः भविष्यन्ति। तदा वयं हठात् कोसलस्य उपरि आक्रमणं करिष्यामः'' इति।

एतत् श्रुत्वा नागकर्णः उक्तवान् - ''एतस्य अपेक्षया अपि अन्यः उत्तमः उपायः अस्ति। वञ्चनया कीर्तिसिंहस्य बन्धनं कृत्वा अनन्तरं 'हारं ददातु अस्मभ्यम्, नो चेत् भवतः पुत्रं मारयामः' इति सुषेणं भाययाम'' इति।

तदा कुण्डिनवर्मा उक्तवान् - ''आम्। एषः एव उत्तमः उपायः। हारः कुत्र अस्ति इति न जानीमः वयम्। सुषेणस्य तु पुत्रविषये अतीव वात्सल्यम्। कीर्तिसिंहः मृतः इति, स च अस्माभिः एव मारितः इति च सुषेणः जानाति चेत् हारस्थानस्य अन्वेषणार्थं विद्यमानान् आधारान् अपि नाशयेत् सुषेणः। पुत्रस्य प्राणरक्षणार्थं चेत् अवश्यं हारं दास्यति सः। अस्माकं हस्तं प्रति हारस्य आगमनानन्तरं कीर्तिसिंहं मारयाम'' इति।

कुण्डिनवर्मणः वचनं नागकर्णः गरुडदत्तः च सन्तोषेण अङ्गीकृतवन्तौ। अनन्तरं च ते निर्णीतवन्तः यत् - बलशालिनः त्रीन् भटान् प्रेषयित्वा, कीर्तिसिंहस्य बन्धनं कारणीयम्। उन्मादजनकम् औषधं पाययित्वा सः कीर्तिसिंहः काम्बोजं प्रति आनाययितव्यः इति। (- अनुवर्तते)






कीर्तिसिंहकथा - ४

(जयवर्मणा दत्तं पत्रं जयसिंहः पठितवान्। तस्मिन् पत्रे अपूर्वः हारः कुत्र अस्ति इति विषयः गूढशैल्या निरूपितः आसीत्। जयवर्मा तां गूढशैलीम् अवगन्तुं न शक्तवान्। एवमेव पञ्च परम्पराः अतीताः। अनन्तरकालीनः राजा सुषेणः इष्टवान् यत् - सः अपूर्वः हारः पुत्रेण कीर्तिसिंहेन प्राप्तव्यः इति। अपूर्वहारप्राप्त्यर्थं जयसेनस्य पुत्र्याः शक्तिसेनायाः बुद्धिचातुर्यम् उपयोक्तव्यम् इति चिन्तितवान् सुषेणः। तस्मिन् एव समये काम्बोजराजः गरुडदत्तः, नगदेशराजः नागकर्णः, चाक्यदेशराजः कुण्डिनवर्मा च कुतन्त्रं कृतवन्तः यत् - अपूर्वहारः कोसलश्च कथमपि वशीकरणीयः इति। गुरुकुलात् प्रस्थाय आगच्छतः कीर्तिसिंहस्य बन्धनार्थं त्रयः अपि उपायं चिन्तितवन्तः। अनन्तरम् ...)

अत्र कोसलात् शक्तिसेनायाः प्रस्थानसमये एव गरुडदत्तेन तस्य मित्रेण च प्रेरिताः त्रयः भटाः काम्बोजतः प्रस्थिताः।

'शक्तिसेना मध्येमार्गं मेलिष्यति' इति विषयं न जानाति कीर्तिसिंहः। कृष्णचन्द्रस्य गुरुकुले स्वकीयं विद्याभ्यासं समाप्य स्वदेशं प्रति गमने उत्सुकः आसीत् कीर्तिसिंहः। गुरुकुलात् तस्य प्रस्थानदिनं कृष्णप्रतिपत्। तस्मिन् दिने उषसि एव उत्थाय कीर्तिसिंहः गुरुं कृष्णचन्द्रं प्रणम्य तस्य अनुग्रहं प्राप्तवान्। अनन्तरं च सः निश्चिते मुहूर्ते भानुमतीनामिकाम् उत्तमाश्वाम् आरुह्य प्रस्थितवान्।

किञ्चित्कालानन्तरं कीर्तिसिंहः पर्वत-प्रान्तस्थं कञ्चित् अरण्यप्रदेशं प्राप्तवान्। तस्मात् प्रदेशात् उत्तरदिशि प्रयाणं कृतं चेत्



कोसलराजधानी प्राप्यते । पूर्वदिशि प्रयाणं कृतं चेत् कोसलस्य पूर्वसीमा, ततश्च अग्रे शक्तिदेवालयः, ततोऽपि अग्रे गम्यते चेत् काम्बोजराज्यं च प्राप्यते । तावत्पर्यन्तम् अपि वायुवेगेन प्रयाणं कृतवती भानुमती तं प्रदेशं प्राप्य अकस्मात् स्थितवती ।

भानुमती आदिनं क्षणकालस्य अपि विश्रान्तिं विना वायुवेगेन प्रयाणं कर्तुं समर्था । ताद्दशी भानुमती हठात् वेगं स्थगितवती, अग्रे गमने असम्मतिं प्रदर्शितवती च । एतस्मात् कीर्तिसिंहः आश्चर्यचकितः । तस्य सन्देहः अपि उत्पन्नः । अनुक्षणं कीर्तिसिंहः अश्वातः अवतीर्य अवलोकितवान् यत् - समीपे कुत्रापि क्रूरमृगात् भीतिः स्यात् वा इति । ताद्दशं सन्देहास्पदं चिह्नं कुत्रापि न दृष्टं कीर्तिसिंहेन ।

अनन्तरं कीर्तिसिंहः 'अत्रैव मम काचित् विपत् समुपस्थिता' इति चिन्तयित्वा भानुमतीम् उद्दिश्य - "भानुमति ! या कापि आपत् उपस्थिता भवतु । अहं सम्मुखीकरोमि । भवती धैर्येण अग्रे गच्छतु" इत्युक्त्वा भानुमतीम् आरोढुम् उद्युक्तः । किन्तु भानुमती अग्रे गन्तुम् अनिच्छन्ती हेषारवम् अकरोत् ।

तदा कीर्तिसिंहः - "भवतु । तर्हि किञ्चिदूरं पादाभ्याम् एव गच्छाव" इति भानुमतीं वदन् कोषतः खड्गं निष्कास्य सावधानम् अग्रे गतवान् । भानुमती कीर्तिसिंहम् अनुसृतवती । उभौ अपि किञ्चिदूरं गतवन्तौ ।

तस्मिन् समये शिरसः उपरिष्टात् वायुवेगेन आगच्छतः कस्यचन वस्तुनः शब्दं श्रुत्वा कीर्तिसिंहः उपरि दृष्टवान् । कीर्तिसिंहः यत्र स्थितवान् आसीत्, तस्मिन् प्रदेशे कश्चन महान् वटवृक्षः आसीत् । तस्मात् वटवृक्षात् क्रूरमृगाणां ग्रहणार्थं भिल्लैः उपयुज्यमानम् अयसः जालं महता वेगेन कीर्तिसिंहम् उद्दिश्य एव आगच्छत् अस्ति । कीर्तिसिंहः शब्दं श्रुत्वा यावत् उपरि दृष्टवान्, तावति काले जालं कीर्तिसिंहस्य शिरस्पर्शम् अकरोत् । कीर्तिसिंहः तत्क्षणे खड्गेन जालस्य वेगं स्थगयन्, तत् जालं पार्श्वे नुदन् झटिति पार्श्वे स्थितवान् । कीर्तिसिंहम् अनुसृत्य आगच्छन्त्याः भानुमत्याः उपरि जालं

पतितम् । जाले पतिता भानुमती बहिः आगन्तुं न शक्तवती ।

अकस्मात् प्रवृत्तया एतया घटनया कीर्तिसिंहः दिग्भ्रान्तः । तथापि सः क्षणाभ्यन्तरे एव आत्मानं निगृह्य कटौ विद्यमानां छुरिकां स्वीकृत्य वटवृक्षम् उद्दिश्य क्षेप्तुम् उद्युक्तः । तावता अन्यस्मात् प्रदेशात् वृक्षे बाणवृष्टिः एव आरब्धा । तेषां बाणानां प्रहारं सोढुम् अशक्ताः त्रयः भटाः वृक्षात् अधः पतिताः, मृताः च ।

एतत् दृष्ट्वा कीर्तिसिंहः आश्चर्यचकितः । अनन्तरं सः खड्गं गृहीत्वा परितः पश्यन् उच्चस्वरेण पृष्टवान् - "कः तत्र ?" इति ।

तस्य प्रश्नस्य उत्तरं किमपि न आगतम् । किन्तु पुरस्तात् गुल्मप्रदेशात् कश्चित् युवकः अग्रे आगत्य कीर्तिसिंहं नमस्कृतवान् ।

युवकस्य सविनयं व्यवहारं दृष्ट्वा कीर्तिसिंहः तं युवकं पृष्टवान् - "कः भवान् ? मृताः एते के ?" इति ।

तदा युवकः सविनयम् उक्तवान् - "मृताः एते के इति अहं न जानामि । परिशीलनेन चिह्नं किमपि लभ्येत" इति ।

अनन्तरं कीर्तिसिंहः मौनं भानुमतीसमीपं गत्वा तां जालात् उन्मोचितवान् । ततश्च शत्रुभटानां वस्त्राणि शोधयितुम् उद्युक्तः अभवत् । तस्मिन् समये, अन्ये केऽपि आक्रमणं कुर्युः इति भावनया युवकः खड्गं गृहीत्वा रक्षणार्थं सिद्धः सन् कीर्तिसिंहस्य पार्श्वे एव स्थितवान् आसीत् ।

त्रयाणाम् अपि भटानां वस्त्रशोधनेन कीर्तिसिंहः ज्ञातवान् यत् - त्रिषु एकः काम्बोजदेशीयः, द्वितीयः चाक्यदेशीयः,





तृतीयश्च नगदेशीयः इति । कोसल-काम्बोजदेशयोर्मध्ये बहोः कालात् शत्रुत्वम् अस्ति इति विषयं जानाति स्म कीर्तिसिंहः । अतः इदानीं कीर्तिसिंहः ज्ञातवान् - 'ते त्रयः अपि देशाः सम्भूय कोसलविषये कुतन्त्रं किमपि आचरन्तः सन्ति' इति।

अनन्तरं कीर्तिसिंहः युवकम् उद्दिश्य पृष्टवान् - "इदानीं वदतु - कः भवान् ?" इति।

तदा युवकः गाम्भीर्येण विनयेन च उक्तवान् - "भवतः प्रश्नस्य उत्तरम् अनन्तरं कथयामि। तत्पूर्वं मम प्रश्नस्य उत्तरं वदतु" इति।

एतत् श्रुत्वा कीर्तिसिंहः साश्चर्यं युवकं पश्यन् उक्तवान् - "कः प्रश्नः ? वदतु" इति।

तदा युवकः शिरः किञ्चित् अवनमय्य पृष्टवान् - "आकाशस्य राजा राज्ञी च कौ ?" इति।

एतं प्रश्नं श्रुत्वा कीर्तिसिंहः युवकं सूक्ष्मं परिशीलयन् 'शक्तिसेने !' इति मन्दस्वरेण आहूतवान्।

तदा युवकवेषधारिणी शक्तिसेना उक्तवती - "मम प्रश्नस्य उत्तरम् एतत् न" इति।

एतत् श्रुत्वा कीर्तिसिंहस्य मुखे मन्दहासः ! तस्मिन् समये सः बाल्ये प्रवृत्तां घटनां स्मृतवान् । पूर्वं कार्तिकमासस्य पूर्णिमायां मात्रा सह कार्तिकदीपोत्सवं गतवती आसीत् शक्तिसेना । कीर्तिसिंहः अपि मात्रा सह तं दीपोत्सवं प्रति गतवान् आसीत्। तत्र उत्सवे आकाशे प्रकाशमानानां बहूनां नक्षत्राणां मध्ये विराजमानं चन्द्रं दृष्ट्वा आनन्दातिरेकेण शक्तिसेना उक्तवती आसीत् - "आकाशः कियत्सुन्दरः ! नदीजले प्लवमानानां दीपानाम् अपेक्षया आकाशस्थानि नक्षत्राणि एव अत्यन्तं सुन्दराणि । भूमौ महाराजत्वप्राप्त्यपेक्षया अपि आकाशस्य महाराजपदवीप्राप्तिः इतोऽपि प्रियतमा । कीर्तिसिंह ! भवान् आकाशस्य राजा भवितुं शक्नोति वा ?" इति।

तदा कीर्तिसिंहः एवम् उक्तवान् आसीत् - "शक्तिसेने ! अहम् अवश्यम्



आकाशस्य राजा भविष्यामि । भवतीं च आकाशस्य महाराज्ञीं करिष्यामि'' इति।

कीर्तिसिंह-शक्तिसेनयोः परस्परं सम्भाषणं श्रुत्वा तयोः मातरौ आनन्देन हसितवत्यौ आस्ताम्।

पूर्वतनम् एतां घटनां स्मृत्वा कीर्तिसिंहः चिन्तितवान् - 'पूर्वतनः अनुरागः इदानीम् अपि अस्ति वा न वा इति परीक्षितुम् एव शक्तिसेना पृष्टवती यत् - आकाशस्य राजा राज्ञी च कौ इति' इति।

अनन्तरं कीर्तिसिंहः मन्दहासपूर्वकं शक्तिसेनासमीपं गत्वा ताम् उद्दिश्य - ''आकाशस्य राजा कीर्तिसिंहः । राज्ञी शक्तिसेना । एवं ननु ? मम उत्तरं युक्तं खलु ?'' इति पृष्टवान्।

एतत् श्रुत्वा शक्तिसेना अङ्गीकारपूर्वकं शिरः चालयन्ती लज्जया शिरः अवनमय्य स्थितवती।


क्षणकालानन्तरं कीर्तिसिंहः शक्तिसेनां पृष्टवान् - ''किमर्थम् एतेन वेषेण भवती अत्र आगतवती ?'' इति।

तदा शक्तिसेना - ''भवतः पिता महाराजः एव माम् अत्र प्रेषितवान्'' इति वदन्ती प्रवृत्तं सर्वं निवेद्य स्ववस्त्रे गोपितां दन्तपेटिकां निष्कास्य कीर्तिसिंहाय दत्तवती।

अनन्तरं कीर्तिसिंहः गाम्भीर्येण चिन्तयन् उक्तवान् - ''भवती एतया दन्तपेटिकया सह आगच्छति इति वार्तां ज्ञात्वा भवत्याः उपरि आक्रमणार्थम् एते भटाः अपि आगतवन्तः स्युः किल !'' इति।

तदा शक्तिसेना उक्तवती - ''मम प्रस्थानविषयम् एते प्रायः न जानन्ति स्म। यतः महाराजः त्वरया मम प्रयाणं निश्चितवान् आसीत्'' इति।

एतत् श्रुत्वा कीर्तिसिंहः - ''एवम् अपि स्यात् । मम बन्धनद्वारा मम प्राणान् पणीकृत्य अपूर्वं हारं वशीकर्तुं प्रयत्नं कृतवन्तः स्युः एते। कारणं तु किमपि स्यात् नाम । अस्मिन् कुतन्त्रे त्रयः अपि देशाधिपतयः भागभागिनः इति तु सुस्पष्टम्। इदानीम् अस्माकं समयः अत्यल्पः अस्ति । एते त्रयः अपि भटाः मम बन्धनं कृत्वा पूर्वनिश्चिते समये गम्यं स्थलं न प्राप्तवन्तः इति कारणतः एतत्पक्षीयाः



पुनरपि अवश्यं मम अन्वेषणं करिष्यन्ति। अतः यावच्छीघ्रं कार्यं समाप्य आवाभ्याम् इतः नगरं गन्तव्यम्'' इति उक्त्वा पेटिकातः पत्रं निष्कास्य क्षणकालं पठितवान्। अनन्तरं च शक्तिसेनां पृष्टवान् - ''परमेश्वरी कं शरणं गच्छति ?'' इति।

तदा शक्तिसेना मन्दहासपूर्वकम् उक्तवती - ''पुनरपि प्रश्नं पठतु। परमेश्वरी अपि काचित् स्त्री। स्त्री कं शरणं गच्छति ? पतिं खलु ? अतः निश्चितं यत् परमेश्वरी परमेश्वरं शरणं गच्छति इति'' इति।

''एवं तर्हि अग्रिमं सुलभतया ज्ञायते। परमेश्वरस्य वासस्थानम् उत्तरदिशि भवति। मानवानां जीवनाधारम् आहारं पञ्चभूतेषु अन्यतमा भूमिः ददाति। पादपरिमाणेन समग्रायाः भूम्याः मापनं कुर्वता वामनेन पादत्रयपरिमिता भूमिः प्रार्थिता'' इति उक्तवान् कीर्तिसिंहः।

तदा शक्तिसेना कीर्तिसिंहम् उद्दिश्य - ''एते अंशाः सुलभतया ज्ञातुं शक्यन्ते कीर्तिसेन ! किन्तु समस्या एषा यत् - एतेषाम् अंशानाम् आधारेण सः अपूर्वहारः कुत्र अस्ति इति कथं ज्ञातुं शक्यते इति'' इति उक्तवती।


शक्तिसेनायाः वचनं श्रुत्वा कीर्तिसिंहः क्षणकालं विचिन्त्य उक्तवान् - ''शक्तिसेने ! एतेभ्यः अंशेभ्यः ऊह्यते यत् - हारः शक्तिदेवालये उत्तरस्यां दिशि भूमौ पादत्रयपरिमिते गर्ते गुप्तरूपेण स्थापितः स्यात् इति'' इति।

एतत् श्रुत्वा शक्तिसेनायाः मुखं प्रसन्नं जातम्।

अनन्तरं कीर्तिसिंहः - ''शक्तिसेने ! गच्छाव। सूर्यास्ताभ्यन्तरे शक्तिदेवालयः प्राप्तव्यः आवाभ्याम्'' इति वदन् अश्वम् आरुह्य प्रस्थितः।

शक्तिसेना अपि तस्य वचनम् अङ्गीकृत्य अश्वम् आरुह्य कीर्तिसिंहम् अनुसृतवती। उभौ अपि वेगेन अग्रे गतवन्तौ।

अन्धकारप्रसारतः पूर्वम् एव ताभ्यां शक्तिदेवालयः प्राप्तः। उभौ अपि अश्वात् अवतीर्य देवालयं प्रविष्टवन्तौ। तस्मिन् देवालये देव्याः पूजा न प्रचलति स्म, सः प्रदेशः निर्जनश्च आसीत् इति कारणतः सः देवालयः स्वच्छः न आसीत्, अपि तु



धूलियुक्तः ऊर्णनाभजालैः युक्तः च आसीत्। देवालयस्य प्राकारेषु लताः गुल्मरूपेण प्रवृद्धाः आसन्।

शिथिलावस्थायां स्थितं, नितराम् अस्वच्छं च तं देवालयं दृष्ट्वा कीर्तिसिंहः शक्तिसेना च अत्यन्तं खिन्नौ।

अनन्तरं कीर्तिसिंहः शक्तिसेनया आनीतया कुञ्चिकया देवालयस्य मुखद्वारम् उद्घाट्य अन्तः गतवान्। शक्तिसेना अपि कीर्तिसिंहम् अनुसृतवती। देवालयस्य गर्भगृहप्रदेशे कृष्णवर्णीयः शक्तिविग्रहः दृष्टः ताभ्याम्। शक्तेः नासिकाप्रदेशे वज्रमयं नासाभरणं कान्त्या प्रकाशमानम् आसीत्। शक्तिसेना कीर्तिसिंहः च भक्तिपूर्वकं शक्तिविग्रहं नमस्कृतवन्तौ।

कीर्तिसिंहः शक्तिं प्रार्थितवान् - "अम्ब! करुणासागरे! न्यायरूपेण या सम्पत्तिः मदीया भवेत्, तदर्थम् अत्र आगतवान् अस्मि अहम्। सम्पत्तिः मदीया चेदपि तस्य फलस्य विनियोगं प्रजानां हितार्थम् एव करिष्यामि इति भवत्याः पुरतः प्रतिज्ञां कुर्वन् अस्मि। मम योग्यतायाः विषये मम अपेक्षया भवती एव सम्यक् जानाति। मयि भवत्याः विश्वासः अस्ति चेत् तदेव मम महत् सौभाग्यम् इति भावयामि। ततोऽपि अधिकं किमपि भवतीतः न अभिलषामि अहम्। अस्मिन् कार्ये मम जयः भवेत्, उत अपजयः इति भवती एव निर्णयं करोतु" इति।

अनन्तरं कीर्तिसिंहः शक्तिसेना च देवालयस्य उत्तरभागं प्रति गतवन्तौ। तत्र कश्चित् बिल्ववृक्षः आसीत्।

कीर्तिसिंहः बिल्ववृक्षं परिशीलयन् शक्तिसेनाम् उक्तवान् - "शक्तिसेने! पश्यतु। महाशिवस्य अत्यन्तं प्रीतिदायकः वृक्षः बिल्ववृक्षः। अपूर्वः हारः अत्रैव कुत्रापि निक्षिप्तः स्यात्" इति।

एतत् श्रुत्वा शक्तिसेना पृष्टवती - "भवतः चिन्तनं सम्यक् एव स्यात्। किन्तु खननसाधनं किमपि न आनीतवन्तौ खलु आवाम्? अतः खननं कथं करवाव?" इति।

(आगामिन्यां सञ्चिकायां समाप्तिः।)





कीर्तिसिंहकथा

५

(कीर्तिसिंहः गुरुकुले स्वविद्याभ्यासं समाप्य गुरोः कृष्णचन्द्रस्य आशीर्वादं प्राप्य राजधानीं प्रति प्रस्थितवान्। मध्येमार्गं आरावलीपर्वतप्रदेशस्य क्रमणसमये कीर्तिसिंहस्य बन्धनार्थं तत्र आगताः केचन शत्रुभटाः अयसः जालं क्षिप्तवन्तः। तावता तत्र गुप्तरूपेण स्थिता पुरुषवेषधारिणी शक्तिसेना शत्रुभटान् बाणप्रयोगेण मारितवती। कीर्तिसेनः शक्तिसेनाम् अभिज्ञाय तया दत्तं पत्रं पठितवान्। शक्तिसेना कीर्तिसिंहः च अरण्यमध्यस्थं देव्याः आलयं गत्वा देवीं नमस्कृत्य हारस्य अन्वेषणम् आरब्धवन्तौ। अनन्तरम् ...)

कीर्तिसेनः शक्तिसेनां प्रति प्रत्युत्तरं किमपि अवदन् देव्याः आलयं गत्वा पुरातनं त्रिशूलम् आनीतवान्।

'खननं कुत्र कृतं चेत् लाभः भवेत् ? बिल्ववृक्षस्य अधोभागे खननेन अपि किमपि प्रयोजनं नास्ति। यतः बिल्ववृक्षस्य मूलानि सर्वत्र सम्यक् प्रसृतानि भवन्ति। एतत् पत्रं तु आधारमात्रम्। पत्रे विद्यमानानाम् अंशानाम् आधारेण खननं कुत्र करणीयम् इति निश्चेतव्यम्' इति विचिन्त्य कीर्तिसिंहः बिल्ववृक्षस्य उत्तरभागं गतवान्। बिल्ववृक्षस्य उत्तरभागे पादत्रयपरिमितदूरे सूक्ष्मं परिशीलितवान्। तत्र सस्यानां मध्ये चतुरस्राकारिका प्राकारस्य काचित् शिला दृष्टिगोचरा जाता।

एतत् एव चिह्नं स्यात् इति विचिन्त्य



कीर्तिसिंहः त्रिशूलेन तां शिलाम् अपसारितवान्। तत्रैव खननम् आरब्धवान् च। कीर्तिसिंहः यदा खननम् आरब्धवान्, तदा शक्तिसेना कीर्तिसिंहम् एव पश्यन्ती मनसा एव देवीं प्रार्थितवती - ''अम्ब ! स्वराज्यार्थं, स्वप्रजानां हितार्थं च युवराजः कीर्तिसिंहः बद्धकटिः सन् अत्यन्तं परिश्रमं कुर्वन् अस्ति इति यत्, तत् भवती जानाति एव। 'स्वकार्ये सः जयं यथा प्राप्नुयात् तथा अनुगृह्णातु कृपया' इति अहं भवतीं सविनयं प्रार्थये। भवतीं शरणागतयोः आवयोः रक्षणं भवती अवश्यं करिष्यति इति अहं दृढं [illegible]सिमि'' इति।

त्रयपरिमितं खननं यदा कृतं तदा की. सिंहेन एका लघ्वी अयसः पेटिका प्राप्ता। शिथिलां तां पेटिकाम् उद्घाटितवान् कीर्तिसिंहः। अयसः पेटिकायाः अन्तः एका कांस्यपेटिका आसीत्। कुतूहलेन कांस्यपेटिकाम् उद्घाटितवान् कीर्तिसिंहः। कांस्यपेटिकायाः अन्तः एका रजतपेटिका आसीत्। रजतपेटिकायाः अन्तः रजतमयं पत्रमेकम् आसीत्।


रजतपत्रे सुवर्णाक्षरैः एवं लिखितम् आसीत् - ''सृष्टिः, सृष्टिकर्तुः गृहे, सृष्टिकर्तुः शरीरस्य अर्धभागे अस्ति'' इति।

अनन्तरं कीर्तिसिंहः कांस्यपेटिकां अयसः पेटिकायां यथापूर्वं संस्थाप्य तां पेटिकां भूमौ निक्षिप्तवान्। रजतपेटिकां केवलां स्वीकृत्य स्ववक्षे सुरक्षितं स्थापितवान्।

तावता सायङ्कालः जातः। रात्रिरपि आसन्ना। किन्तु तदिनं कृष्णप्रतिपत् आसीत् इति कारणतः कृष्णपक्षचन्द्रः कान्त्या शोभते स्म। सर्वत्र कौमुदी प्रसृता आसीत्।

अनन्तरं शक्तिसेना कीर्तिसिंहः च ततः पुनः देव्याः आलयं गतवन्तौ। भक्त्या देवीं साष्टाङ्गं नमस्कृतवन्तौ च।

कीर्तिसिंहः देवीं नमस्कुर्वन् प्रार्थितवान् - ''अम्ब ! करुणासागरे ! भवत्याः कृपाकारणतः एव सर्वं कार्यं निर्विघ्नं प्रचलत् अस्ति। माम् अनुगृह्णती भवती मयि महत् उत्तरदायित्वम् आरोपितवती अस्ति। अहं भवतीं प्रतिदिनं पूजयन् आनन्दं यथा प्राप्नुयां, तथा माम् अनुगृह्णातु कृपया'' इति।





कीर्तिसिंहस्य प्रार्थनासमाप्त्यनुक्षणम् एव आलये उज्ज्वला कान्तिः दृष्टा। समग्रे आलये प्रकाशः प्रसृतः। तस्मिन् प्रकाशे कृष्णवर्णीयः शक्त्याः विग्रहः अतीव कान्त्या प्रकाशते स्म। शक्तिदेव्याः मुखं पूर्वापेक्षया अपि प्रसन्नं दृश्यते स्म। शक्तिदेवी मन्दहासं प्रकटयन्ती अस्ति इव भासते स्म।

एतस्मात् अतीव सन्तुष्टौ शक्तिसेना-कीर्तिसिंहौ देवीं पुनरपि भक्त्या साष्टाङ्गं नमस्कृतवन्तौ।

तावता काचित् अशरीरवाणी श्रुता - "वत्स ! कीर्तिसिंह ! भवतः राजधान्याः सुगन्धिजलसरोवरस्य पार्श्वस्थे प्रदेशे एकं देवालयं निर्मातु भवान्। आगामिन्यां चैत्रशुद्धदशम्यां शुक्रवासरे 'ज्वालामुखी' नाम्ना एतां शक्तिदेवीं तस्मिन् देवालये प्रतिष्ठापयतु। तस्मात् भवान् सन्मङ्गलानि प्राप्स्यति" इति।

एतत् श्रुत्वा शक्तिसेना कीर्तिसिंहः च अतीव सन्तुष्टौ।

तौ उभौ अपि पुनरपि देवीं प्रणम्य ज्वालामुखीदेव्यै कृतज्ञतां समर्पितवन्तौ। अनन्तरं तौ देवालयतः बहिः आगत्य मुख्यद्वारं पिधाय यथापूर्वं कीलितवन्तौ। अनन्तरं च स्वकीयम् अश्वम् आरुह्य राजधानीं प्रति प्रस्थितवन्तौ च।

देवालयात् कीर्तिसिंहस्य शक्तिसेनायाः च निर्गमनानन्तरं देवालयः अन्धकारमयः जातः।

कौमुदीप्रकाशे वायुवेगेन प्रयाणं कुर्वन्तौ शक्तिसेना कीर्तिसिंहः च अनन्तरदिने मध्याह्नसमये राजधानीं प्राप्तवन्तौ।

राजधानीं प्राप्य कीर्तिसिंहः शक्तिसेनाम् उक्तवान् - "इदानीं भवती साक्षात् भवत्याः गृहं गच्छतु। अहं पित्रा महाराजेन सह अनन्तरं भवत्याः गृहम् आगमिष्यामि" इति।

कीर्तिसिंहस्य वचनं श्रुत्वा शक्तिसेना अङ्गीकारपूर्वकं शिरः चालयन्ती स्वगृहं प्रति प्रस्थिता। कीर्तिसिंहः ततः साक्षात् अन्तःपुरं गतवान्।

पुत्रस्य कीर्तिसिंहस्य आगमनम् एव प्रतीक्षमाणौ आस्तां तस्य मातापितरौ ! तौ गुरुकुलात् आगतं पुत्रं दृष्ट्वा अतीव सन्तुष्टौ। किञ्चित्कालं यावत् कुशलसम्भाषणं

प्रवृत्तम् । अनन्तरं कीर्तिसिंहः पितरं रहस्यस्थानं नीत्वा मध्येमार्गं प्रवृत्तं सर्वं निवेदितवान्।

पुत्रस्य वचनं श्रुत्वा अतीव सन्तुष्टः राजा कीर्तिसिंहम् उद्दिश्य - "वत्स ! वयं धन्याः। देवी अस्मान् अवश्यम् अनुग्रहीष्यति। इदानीं हारः कुत्र अस्ति ? तद्विषये भवान् किं चिन्तितवान् ?" इति पृष्टवान्।

तदा कीर्तिसिंहः मन्दहासपूर्वकम् उक्तवान् - "अपूर्वहारः सद्यः एव अस्माभिः प्राप्यते। तदर्थम् एव आवाभ्यां जयसेनस्य गृहं गन्तव्यम् अस्ति" इति।

"भवतु, अद्य रात्रौ जयसेनस्य गृहं गच्छाव" इति उक्तवान् राजा सुषेणः।

तस्मिन् दिने रात्रौ भोजनानन्तरं कीर्तिसिंहः, सुषेणः च जयसेनस्य गृहं गतवन्तौ । महाराजं सुषेणं युवराजं कीर्तिसिंहं च जयसेनः आदरेण सत्कुर्वन् उक्तवान् - "अद्य भवन्तौ गृहम् आगच्छतः इति मम पुत्री उक्तवती आसीत्" इति।

महाराजः सुषेणः, कीर्तिसिंहः, जयसेनः च किञ्चित्कालं यावत् कुशलसम्भाषणं कृतवन्तः । अनन्तरं महाराजः सुषेणः जयसेनं पृष्टवान् - "जयसेन ! भवतः गृहे पुरातनः सरस्वतीविग्रहः अस्ति वा ?" इति।


महाराजस्य प्रश्नं श्रुत्वा जयसेनः आश्चर्येण - "अस्ति पुरातनः कश्चन विग्रहः" इति वदन् गृहस्य अन्तः गत्वा वीणां वादयन्त्याः सरस्वत्याः विग्रहम्



आनीतवान् । विग्रहं महाराजाय यच्छन् उक्तवान् - "अस्माकं पूर्वजाः एतं विग्रहं कारितवन्तः आसन् इति श्रुतवान् अहम्। किन्तु भवान् अपि एतम् एव विग्रहं पृष्टवान् इति यत् तत् आश्चर्यं जनयति मम" इति।

तदा कीर्तिसिंहः मन्दहासपूर्वकं जयसेनं पृष्टवान् - "भवतः पुत्री अपि एतम् एव विग्रहं पृष्टवती वा ?" इति।

तदा जयसेनः उक्तवान् - "आम् ! मम पुत्री शक्तिसेना गृहं प्रति आगमनानुक्षणम् एव पृष्टवती यत् - पुरातनः सरस्वतीविग्रहः कोऽपि अस्ति वा ? इति । अहम् एतं पुरातनविग्रहम् आनीय दत्तवान्। शक्तिसेना विग्रहं स्वप्रकोष्ठं नीत्वा बहुकालं यावत् एकाकिनी प्रकोष्ठे एव उपविष्टवती आसीत्।



अनन्तरं च प्रकोष्ठात् बहिः आगत्य विग्रहं यथास्थानं स्थापितवती । यदा अहं कारणं पृष्टवान्, तदा सा - 'अद्य रात्रौ कीर्तिसिंहः महाराजः च आगमिष्यतः । तौ विषयं भवन्तं वदतः' इति माम् उक्तवती'' इति ।

एतत् श्रुत्वा कीर्तिसिंहः हसन् उक्तवान् - ''अस्माकम् आगमनस्य आशयः विग्रहस्वीकरणं तु न'' इति ।

तावता तत्र आगता शक्तिसेना कौशेयवस्त्रेण गोपिताम् एकां लघ्वीं दन्तपेटिकां कीर्तिसिंहाय दत्तवती । कीर्तिसिंहः तां पेटिकां महाराजाय दत्तवान् ।

महाराजः सुषेणः दन्तपेटिकाम् उद्घाटितवान् । पेटिकायां कान्त्या प्रकाशमानः नवरत्नपदकयुक्तः अपूर्वः मौक्तिकहारः आसीत् ।

अपूर्वस्य हारस्य दर्शनेन आश्चर्यचकितः महाराजः शक्तिसेनां पृष्टवान् - ''भवती कुतः एतं हारं प्राप्तवती ?'' इति ।

तदा शक्तिसेना सविनयं महाराजं उद्दिश्य उक्तवती - ''शक्तेः आलयसमीपे खननात् यत् रजतपत्रं लब्धम्, तत्र एवं लिखितम् आसीत् - 'सृष्टिः, सृष्टिकर्तुः गृहे, सृष्टिकर्तुः शरीरस्य अर्धभागे अस्ति' इति । एतस्य तात्पर्यं किं स्यात् इति अहं देवालयतः आगमनसमये चिन्तितवती । यत् सृष्टं भवति, तत् सर्वं सृष्टिः इत्युच्यते । यः सृजति, सः सृष्टिकर्ता । तदनुसारम् एतस्य अपूर्वहारस्य सृष्टिः अस्माकं पूर्वजैः कृता अस्ति । पूर्वजः नाम जयसेनः एव । अतः जयसेनः एव एतस्य हारस्य सृष्टिकर्ता इति तु सुस्पष्टम् । 'सृष्टिकर्तुः गृहम्' इत्युक्ते अस्माकं गृहम् । 'सृष्टिकर्ता' इत्यस्य ब्रह्मा इत्यपि अर्थः स्यात् इति मया ऊहितम् । 'सृष्टिकर्तुः अर्धभागे अस्ति' इत्यस्य तात्पर्यम् - 'सृष्टिकर्तुः पत्नी सरस्वतीदेवी । तस्याम् अस्ति' इति । पत्रस्य अर्थम् एवंरूपेण अवगतवती अहं गृहम् आगत्य मम पितरं विग्रहं पृष्टवती । सूक्ष्मतया विग्रहस्य परिशीलनेन एषः हारः प्राप्तः मया'' इति ।

शक्तिसेनायाः वचनं श्रुत्वा सर्वे अपि सन्तुष्टाः ।

अनन्तरं राजा सुषेणः मन्दहासपूर्वकं जयसेनम् उद्दिश्य - ''जयसेन ! सर्वं कार्यं

निर्विघ्नं समाप्तम् । इदानीम् अस्माकं पणविषये चिन्तनीयम् अस्ति'' इति उक्तवान् ।


महाराजस्य वचनं श्रुत्वा शक्तिसेना लज्जया शिरः अवनमय्य स्थितवती ।

लज्जया शिरः अवनमय्य स्थितवतीं शक्तिसेनां कीर्तिसिंहः अभिमानपूर्वकं दृष्टवान् । 'मम भाविनी पत्नी शक्तिसेना न केवलं सौन्दर्यवती, अपि तु अत्यन्तं सूक्ष्ममतिः चतुरा च' इति ज्ञातवान् कीर्तिसिंहः । शक्तिसेनायाः कीर्तिसिंहस्य च भाविदाम्पत्यं चिन्तयन्तौ सुषेणः जयसेनः च सन्तोषेण मन्दहासं प्रकटितवन्तौ ।

काम्बोजस्य नगदेशस्य चाक्यदेशस्य च अधिपतयः गुप्तचराणां द्वारा वार्तां ज्ञातवन्तः यत् - कीर्तिसिंहस्य बन्धनार्थं तैः प्रेषिताः सैनिकभटाः अरण्ये मरणं प्राप्तवन्तः इति, अपि च कीर्तिसिंहेन अपूर्वः हारः प्राप्तः अस्ति इति, ज्वालामुखीदेवी कीर्तिसिंहम् अनुगृहीतवती अस्ति इति, कोसले ज्वालामुखीदेव्याः आलयस्य निर्माणार्थं शक्तिसेना-कीर्तिसिंहयोः विवाहार्थं, कीर्तिसिंहस्य पट्टाभिषेकार्थं च सिद्धताः प्रचलन्त्यः सन्ति इति च ।

एताः सर्वाः वार्ताः श्रुत्वा नग-चाक्य-काम्बोजदेशानां राजानः कुतन्त्रं विफलं जातम् इति निराशाः ।

तेषु नागकर्णः किञ्चित्कालानन्तरम् उत्साहं प्राप्य अपरौ उभौ अपि सान्त्वयन् उक्तवान् - ''यत् प्रवृत्तं, तत् अस्माकं हिताय



एव जातम् । कोसलदेशः उत्सवसमारम्भे यदा मग्नः भवति, तदा वयं त्रयः अपि ससैन्यं गत्वा हठात् कोसलस्य उपरि आक्रमणं करवाम'' इति ।

नागकर्णस्य एतत् वचनं सर्वे अङ्गीकृतवन्तः । युद्धसन्नाहः च आरब्धः ।

किन्तु कोसले वस्तुस्थितिः एषा असीत् यत् तत्र वस्तुतः याः सिद्धताः प्रचलन्त्यः आसन् ताः युद्धार्थम् एव । उत्सवसमारम्भः तु शत्रूणां सम्मुखीकरणार्थम् आयोजितः उपायः ।

तदा तदा परिस्थितिं परिशीलयन् कीर्तिसिंहः शत्रुसैनिकानां युद्धसन्नाहस्य समाप्तिः पूर्वम् एव युद्धसन्नद्धः जातः । युवराजस्थाने तिष्ठन् एव महाप्रमाणकस्य

सैन्यस्य नायकत्वं वहन् काम्बोजस्य उपरि आक्रमणं कृतवान् सः।

सैन्याध्यक्षस्य रणमल्लस्य नायकत्वे सैन्यस्य कश्चन भागः उत्तरभागस्थस्य नगदेशस्य उपरि आक्रमणम् अकरोत्।

सुशिक्षिताः कोसलसैनिकाः महान्तं श्रमं विना एव काम्बोजदेशं नगदेशं च स्वायत्तीकृतवन्तः। अनन्तरं कीर्तिसिंहः चाक्यदेशस्य उपरि आक्रमणं कृत्वा राज्ञः कुण्डिनवर्मणः बन्धनं कृतवान्।

कोसलविषये कुतन्त्राचरणार्थम् अन्ये च ये देशाः साहाय्यं कृतवन्तः, तेषाम् उपरि अपि आक्रमणं कृत्वा कीर्तिसिंहः तान् देशान् अपि स्वाधीनान् कृतवान्।

एतस्मात् भीताः अन्ये केचन राजानः कीर्तिसिंहं शरणं गताः। ते तं प्रार्थितवन्तः - "कृपया अस्मान् रक्षतु। वयं भवतः अधीनाः एव भवामः" इति।

कीर्तिसिंहः युद्धं समाप्य विजयोत्साहेन कोसलं प्रतिगतवान्। तावता देव्याः ज्वालामुख्याः आलयनिर्माणं समाप्तप्रायम् आसीत्।

विजयोत्साहेन सहैव कीर्तिसिंहस्य विवाहसिद्धता आरब्धा कोसले।

महता वैभवेन शक्तिसेना-कीर्तिसिंहयोः विवाहः सम्पन्नः। कीर्तिसिंहस्य मातापितरौ, शक्तिसेनायाः मातापितरौ, गुरुः कृष्णचन्द्रः च शक्तिसेनां कीर्तिसिंहं च आशिषा अनुगृहीतवन्तः। सर्वाः अपि प्रजाः अतीव सन्तुष्टाः।

चैत्रमासः समायातः। ज्वालामुखीदेव्याः आलयः सिद्धः जातः। देव्याः विग्रहः अरण्यतः आनीतः।

चैत्रशुद्धदशम्यां शुक्रवासरे शक्तिसेना कीर्तिसिंहः च नूतनतया निर्मिते आलये ज्वालामुखीदेवीं प्रतिष्ठापितवन्तौ।

पूर्वजानां कालतः निरीक्षितम् इदं शुभदिनं द्रष्टुं शक्ताः इति सुषेणः, वैष्णवीदेवी, जयसेनः, तस्य पत्नी च अतीव सन्तुष्टाः। ते अभिमानपूर्वकं पुत्रौ आशिषा अनुगृहीतवन्तः।

(समाप्तम्)

